## 2. द्वितीयः पाठः

### उत्तमः छात्रः

वर्तमानकाले प्रथमपुरुषः - ति/तः/अन्ति

एषः राजेशः ।
राजेशः उत्तमः छात्रः ।
एषः प्रतिदिनं प्रातः शीघ्रम् उत्तिष्ठति ।
स्नानं करोति ।
देवं नमति ।
पाठं पठति ।
अल्पाहारं स्वीकरोति, विद्यालयं गच्छति ।
राजेशस्य मित्रं राकेशः । एतौ सह पठतः ।
-
विद्यालये अनेके शिक्षकाः सन्ति ।
ते सम्यक् पाठयन्ति । नीतिम् उपदिशन्ति ।
छात्राः श्रद्धया पठन्ति ।
स्वल्पकालं क्रीडन्ति ।
-
राजेशः सायं गृहम् आगच्छति ।
गृहपाठं लिखति । भोजनं करोति ।
दूरदर्शनं पश्यति, ततः पश्चात् शयनं करोति ।

ध्यानेन पठन्तु -

बालः बालौ बालाः -->
बाला बाले बालाः --> गच्छति, गच्छतः, गच्छन्ति
यानम् याने यानानि -->
-